श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमदान्ध्रपूर्णगुरुभिरनुगृहीतं

# ॥ श्रीयतिराजमङ्गळम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीयतिराजमङ्गळम् ॥

श्रीपराङ्कुशपादाब्ज सुरभीकृत मौलये।
श्रीवत्सचिह्ननाथाय यतिराजाय मङ्गळम् ॥ 1 ॥

नाथपद्माक्षरामार्यपादपङ्कज सेविने।
सेव्याय सर्वयमिनां यतिराजाय मङ्गळम् ॥ 2 ॥

पूर्णार्यपूर्णकरुणापात्रायामिततेजसे।
मालाधरप्रियायास्तु यतिराजाय मङ्गळम् ॥ 3 ॥

संसेव्य यामुनाचार्यं एकलव्योस्म्यहं गुरोः।
इत्येवं वदते नित्यं यतिराजाय मङ्गळम् ॥ 4 ॥

श्रीकाञ्चीपूर्णमिश्रोक्त रहस्यार्थविदे सदा।
देवराजप्रियायास्तु यतिराजाय मङ्गळम् ॥ 5 ॥

श्रीमद् गोष्ठीपुरीपूर्णदिव्याज्ञां कुर्वते मुदा।
श्लोकार्थं गृह्णते तस्मात् यतिराजाय मङ्गळम् ॥ 6 ॥

कूरेशकुरुकानाथदाशरथ्यादिदेशिकाः।
यच्छिष्या भान्ति ते तस्मै यतिराजाय मङ्गळम् ॥ 7 ॥

चरमश्लोकतत्त्वार्थं ज्ञात्वार्याज्ञां विलङ्घ्य च।
दिशते तं स्वकीयेभ्यः यतिराजाय मङ्गळम् ॥ 8 ॥

श्रीशैलपूर्णकृपया श्रीरामायणमर्थतः।
भक्त्या येन श्रुतं तस्मै यतिराजाय मङ्गळम् ॥ 9 ॥

शङ्करादिकुदृष्टीनां बाह्यानां निधनाय च।
श्रीभाष्यं कुर्वते तस्मै यतिराजाय मङ्गळम्॥ 10॥

कुर्वन्नुपनिषद्भाष्यं जगद्रक्षां करोति यः।
दयायाः परतन्त्राय भाष्यकाराय मङ्गळम्॥ 11॥

द्रमिडोपनिषद्व्याख्यां कालयेति कृपाबलात्।
शासते कुरुकेशं तं भाष्यकाराय मङ्गळम्॥ 12॥

गत्वा तु शारदापीठं वृत्तिं बोधायनस्य च।
अवलोक्यागतायास्तु भाष्यकाराय मङ्गळम्॥ 13॥

परमाणुमृषावादिवादिसंहारकारिणे।
तस्मै भगवते श्रीमद्भाष्यकाराय मङ्गळम्॥ 14॥

श्रीमत्कुरङ्गपूर्णाय श्रीभाष्यं वदते स्वयम्।
पित्रे संपत्सुतस्यापि भाष्यकाराय मङ्गळम्॥ 15॥

दत्वा वृषगिरीशस्य शङ्खचक्रे रमापतेः।
परमप्रीतियुक्ताय भाष्यकाराय मङ्गळम्॥ 16॥

सन्यासं कुर्वते काञ्च्यां अनन्तसरसीतटे।
वरदे न्यस्तभाराय भाष्यकाराय मङ्गळम्॥ 17॥

श्रीमन्महाभूतपुरे श्रीमत्केशवयज्वनः।
कान्तिमत्यां प्रसूताय यतिराजाय मङ्गळम्॥ 18॥

शेषो वा सैन्यनाथो वा श्रीपतिर्वेति सात्विकैः।
वितर्क्याय महाप्राज्ञैः यतिराजाय मङ्गळम्॥ 19॥

प्रकृष्टगुणपूर्णाय प्राप्याय स्वाङ्घ्रिसेविनाम्।
प्रपन्नसार्थवाहाय यतिराजाय मङ्गळम्॥ 20॥

**वेदात्मकप्रमाणेन सात्विकैश्च प्रमातृभिः।**
**प्रमेयेण सह श्रीमान् वर्धतां यतिशेखरः॥ 21 ॥**

॥ इति श्रीयतिराजमङ्गळं समाप्तम् ॥